শ্ৰীঃ
শ্ৰীমতে নিগমান্তমহাদেশিকায নমঃ
শ্ৰীমান্ ৱেঙ্কটনাথাৰ্যঃ কৱিতাৰ্কিককেসৰী।
ৱেদান্তাচাৰ্যৱৰ্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্ৰী মেল্পপত্তূৰ্ নাৰাযণভট্টতিৰি ৱিৰচিতম্

# ॥শ্ৰীমন্নাৰাযণীযম্ ॥

## দশক - ১৫

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্ৰী ৰঙ্গৰামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using Bengali for TEX.

শ্ৰীঃ
শ্ৰীমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্ৰীমতে রামানুজায নমঃ

# ॥শ্ৰীমন্নারাযণীযম্ ॥

## দশক - ১৫

*কপিলোপদেশম্*

মতিরিহ গুণসক্তা বন্ধকৃত্তেষৱসক্তা-
ত্বমৃতকৃদুপরুন্ধে ভক্তিযোগস্তু সক্তিম্।
মহদনুগমলভ্যা ভক্তিরেৱাত্র সাধ্যা
কপিলতনুরিতি ত্বং দেৱহূত্যৈ ন্যগাদীঃ॥ ১ ॥

প্রকৃতিমহদহঙকারাশ্চ মাত্রাশ্চ ভূতা-
ন্যপি হৃদপি দশাক্ষী পূরুষঃ পঞ্চৱিংশঃ।
ইতি ৱিদিতৱিভাগো মুচ্যতেসৌ প্রকৃত্যা
কপিলতনুরিতি ত্বং দেৱহূত্যৈ ন্যগাদীঃ॥ ২ ॥

প্রকৃতিগতগুণৌঘৈর্নাজ্যতে পূরুষোযং
যদি তু সজতি তস্যাং তদগুণাস্তং ভজেরন্।
মদনুভজনতত্ত্বালোচনৈ সাপ্যপেযাত্
কপিলতনুরিতি ত্বং দেৱহূত্যৈ ন্যগাদীঃ॥ ৩ ॥

ৱিমলমতিরুপাত্তৈঃ আসনাদ্যৈর্মদঙগং
গরুডসমধিরূঢং দিৱ্যভূষাযুধাঙকম্।
রুচিতুলিততমালং শীলযেতানুৱেলং
কপিলতনুরিতি ত্বং দেৱহূত্যৈ ন্যগাদীঃ॥ ৪ ॥

মম গুণগণলীলাকর্ণনৈঃ কীর্তনাদ্যৈঃ
মযি সুরসরিদোঘপ্রখ্যচিত্তানুৱৃত্তিঃ।
ভৱতি পরমভক্তিঃ সা হি মৃত্যোর্ৱিজেত্রী
কপিলতনুরিতি ত্বং দেৱহূত্যৈ ন্যগাদীঃ॥ ৫ ॥

অহ হ বহুলহিংসাসঞ্চিতার্থৈঃ কুটুম্বং
প্রতিদিনমনুপুষ্ণন্ স্ত্রীজিতো বাললালী।
ৱিশতি হি গৃহসক্তো যাতনাং ময্যভক্তঃ
কপিলতনুরিতি ত্বং দেৱহূত্যৈ ন্যগাদীঃ॥ ৬ ॥

যুৱতিজঠরখিন্নো জাতবোধোপ্যকাণ্ডে
প্রসৱগলিতবোধঃ পীডযোল্লঙঘ্য বাল্যম্।
পুনরপি বত মুহ্যত্যেৱ তারুণ্যকালে
কপিলতনুরিতি ত্বং দেৱহূত্যৈ ন্যগাদীঃ॥ ৭ ॥

পিতৃসুরগণযাজী ধার্মিকো যো গৃহস্থঃ
স চ নিপততি কালে দক্ষিণাধৱোপগামী।
মযি নিহিতমকামং কর্মতূদকপথার্থং
কপিলতনুরিতি ত্বং দেৱহূত্যৈ ন্যগাদীঃ॥ ৮ ॥

ইতি সুৱিদিত ৱেদ্যাং দেৱ হে দেৱহূতিং
কৃতনুতিমনুগৃহ্য ত্বং গতো যোগিসঙঘৈঃ।
ৱিমলমতিরথাসৌ ভক্তিযোগেন মুক্তা
ত্বমপি জনহিতার্থং ৱর্তসে প্রাগুদীচ্যাম্॥ ৯ ॥

পরম কিমু বহূক্ত্যা ত্বতপদাম্ভোজভক্তিং
সকলভযৱিনেত্রীং সর্ৱকামোপনেত্রীম্।
ৱদসি খলু দৃঢং ত্বং তদ্বিধূযামযান্ মে
গুরুপৱনপুরেশ ত্বয্যুপাধতস্ব ভক্তিম্॥ ১০ ॥

**********